॥ श्रीः ॥

## ॥ अवतारकथास्तोत्रम् ॥

वरदं वरदन्तिहृदातपहृच्छरदं शरदम्बुजनेत्रयुगम् ।
दरदिव्यरथाङ्गधरं मधुरं मधुराकृतधाम महः कलये ॥ १

कमला कमलायतलोचनवत्यमला यमलासयतानुगुणा ।
शमलालसमौनिमलापहमागमलालितमेनमहं कलये ॥ २

उदधावुदधारि जरत्फणितिर्विबुधारिकथामवधीरयता ।
निदधेऽपि च येन विधातृमुखे विदधातु शमेष तिमीश पुमान् ॥ ३

वरकन्दरमन्दरमन्थनतः कलशोदधिशोधयिता दयिताम् ।
शयतामरसान्वयिनीं जयिनीमयिता दयतामवटः कमठः ॥ ४

नवनीलवनीकलितां ललितामवनीमुपनीय शनैर्दशने ।
शशिनीव कलङ्ककलां कलयन् किरिरूपधरोऽव हरे दुरितात् ॥

तरसा तरसाशनमुद्धलयन् उरसा शरसारखरैर्नखरैः ।
विरसं सुरसन्नुतनैजकृतिर्नरसिम्हतनुर्दुरितं हरतात् ॥ ६

अतिदारुणदानवदेहकमध्वनिदारुणिरूपमुपेत्य वरम् ।
विददार मुदा रभटीभिरसौ नरसिम्हमिमं प्रणमामितमाम् ॥ ७

बलिमत्र पदत्रितयाय रयादुपयाय यदूनपदं तदिदम् ।
पुनरस्य शिरस्युपनीय जयन्नयमस्तु मनस्यति वामनकः ॥ ८

परशावरिशासनभासिनि सत्करशालिनि शान्तिगुणानुगुणः ।
सरसां वसुधासुरसात्कृतवान् सरसां जमदग्निजनुर्जयतु ॥ ९

परशुं परशुग्रचनानुगुणं करशुम्भितमाकलयन् दलयन् ।
प्रतिराजकमाजिकथासु तथा प्रमदं जमदग्निजनुस्तनुतात् ॥ १०

इनवम्शनवाम्बुधिचन्द्रमसं शमसङ्गिजनात्मनि सन्तमसम् ।
शमयन्तमिमं तनवानि हृदा प्रमदाय सदा ननु दाशरथिम् ॥ ११

हलमुज्ज्वलमुत्कलयन् दलयन्नरिवारमवारितशौर्यभरः ।
शुभराजिमराजयथानियतं बलभद्र लभस्व मदीयनतीः ॥ १२

मुरली मुरुलीढसुषिप्रसरत् स्वरलीनमनीषिमनःश्रवणाम् ।
करपङ्करुहे कलयन्तमिमं मुरवैरिणमेष नमस्करवै ॥ १३

धुरि दुष्करकृत्यतुरुष्करणाजिर शुष्करमाङ्गपरिष्करिणीम् ।
करवाललतां करवारिजयोर्दधदस्तु मुदे मम कल्किहरिः ॥ १४

इति निर्मलतिर्मलबुक्कपुरीकुलभर्मलताग्रसुमस्तबकः ।
न्यनुवीदिह वेंकटवर्यसुधीरवधाय हरेरवतारकथाम् ॥ १५

इदमस्ततमस्ततिशत्ततमं परमस्तवनं भविनः कवनम् ।
भुवि ये कलयेयुरमेयरमेक्षणलक्षणसम्पदमेयुरिमे ॥ १६

इति वेङ्कटसुधीविरचितम् अवतारकथास्तोत्रं सम्पूर्णम् ॥